अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ............................

**Paper Code**
**MV-203**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**

**एम.ए. संस्कृत-व्याकरणम्, (सत्रम् : द्वितीयसत्रम)**
**तृतीयपत्रम् – संस्कृतव्याकरणम् (ग)**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' 'घ' इत्याख्येषु चतुष खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः** पृष्टेषु चतुर्षु द्वौ द्वीर्घप्रश्नौ समाधेयौ । **(2×15=30)**

1. यत्र बहूनां समासप्रसङ्गः किं तत्र द्वयोर्द्वयोः समासो भवति, आहोस्विदविशेषेण ?
2. 'चतुर्थी तदर्थार्थबलिहित.' इतिसूत्रं भाष्यकृद्रीत्या व्याख्यायताम्।
3. 'कालाः परिमाणिना' इत्यनेन यस्समासः स किं प्रधानः?
4. 'नञ्' इतियोगे नञो वाचकत्वमुत द्योतकत्वम्?

## खण्डः ख
## (लघूत्तरोयप्रश्नाः)

**निर्देशः** पृष्टेषु सप्तसु चत्वारो लघुप्रश्नाः समाधेयाः। **(4×5=20)**

1. 'कर्मणि च' इत्यत्र कथं सूत्रार्थः – कर्मणि या षष्ठी सा न समस्यते इति।
   आहोस्वित् – कर्मणि यः क्तः – इति ?
2. 'कारणाद् द्रव्ये शब्दनिवेश इति चेत्तुल्यकारणत्वात्सिद्धम्' इति वार्त्तिकं स्पष्टीकुर्वन्तु?
3. 'वा प्रियस्य' इति वार्तिकस्य व्याख्यानङ्कुर्वन्तु।
4. 'विशेषणविशेष्ययोरुभयविशेषणत्वादुभयविशेष्यत्वादुपसर्जनाप्रसिद्धिः' इत्यस्य कोऽभिप्रायः?
5. 'कर्तृकरणे कृता क्तेन' इति वक्तव्यं न वेति ?
6. 'तन्निमित्तग्रहणं वा' इति वार्त्तिकं व्याख्यायताम्।
7. जहत्स्वार्थायामजहत्स्वार्थायाञ्च को विशेषः ?

## खण्डः ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः** पृष्टेषु त्रयोदशसु दश अतिलघुप्रश्नाः समाधेयाः। **(10×01=10)**

1. सामर्थ्यं कतिविधम्? नामानि लिखन्तु।
2. 'तदर्थगतेः' इतिपदे कः समासः ?
3. वृत्तिः कतिधा ?
4. 'निर्वाराणसिः' इत्यस्य विग्रहवाक्यं ज्ञाप्यताम्।

5. 'क्षेपे' इत्यस्योदाहरणानि कानि ?
6. 'उत्पद्यताम्' इत्यस्य पदपरिचयं लिखन्तु।
7. उपमितमिति सूत्रे सामान्याप्रयोग इति किमर्थम्?
8. 'श्रेणिकृताः' इत्यस्य विग्रहः कः ?
9. 'युवा खलति' इत्यनेन सूत्रेण का परिभाषा ज्ञापिता?
10. 'प्राप्तापन्ने च द्वितीयया' इत्यत्र चकारः किमर्थः ?
11. प्रादयः के ?
12. 'नञोऽस्त्यर्थानां च' इत्यस्य कान्युदाहरणानि?
13. द्विदशाः इत्यत्र कः समासः ?

## खण्डः घ

## (वस्तुनिष्ठप्रश्नाः)

**निर्देशः** पृष्टा वस्तुनिष्ठप्रश्नाः समाधेयाः। **(10×01=10)**

1. 'समर्थः पदविधिः' इतियोगः ..............................
   (अ) अधिकारः (ब) परिभाषा
   (स) उभयम् (द) नोभयम्
2. 'राज्ञो गोः क्षीरम्' इत्यत्र विवक्षायां कः समासः सम्भवति ?
   (अ) तत्पुरुषः (ब) द्विगुः
   (स) बहुव्रीहिः (द) न कश्चिद्
3. 'खट्वारूढः' इत्यत्र कस्मिन्नर्थे समासः ?
   (अ) तृतीयायाम् (ब) सप्तम्याम्
   (स) क्षेपे (द) चतुर्थ्याम्
4. 'उच्चैर्मुखः' इत्यत्र कः समासः ?
   (अ) तत्पुरुषः (ब) अव्ययीभावः
   (स) बहुव्रीहिः (द) द्वन्द्वः
5. 'दक्षिणपूर्वा' इत्यत्र केन समासः ?
   (अ) द्विगुः (ब) दिक्सङ्ख्ये सञ्ज्ञायाम्
   (स) तत्र तेनेदमिति (द) दिङ्नामान्यन्तराले
6. 'अभ्यर्हितम्' इतिपदे को धातुः ?
   (अ) हा (ब) हि
   (स) धा (द) अर्ह्
7. 'सपरिवारः' इत्यत्र कः समासः ?
   (अ) तृतीया (ब) अव्ययीभावः
   (स) बहुव्रीहिः (द) कर्मधारयः
8. द्विरित्यत्र कः प्रत्ययः ?
   (अ) सच् (ब) सुच्
   (स) सिच (द) सुट्
9. आङः कोऽर्थः ?
   (अ) ईषदार्थः (ब) पूजार्थः
   (स) निन्दार्थः (द) पापार्थः
10. पात्रे समितादयश्चेत्यत्र चकारः ..............................
    (अ) समुच्चयार्थः (ब) अवधारणार्थः
    (स) अन्वाचयार्थः (द) अनुक्तार्थः

--------------x--------------